दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णाष्टमी
श्रावण 21 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-287 | 1 | अगस्त 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 शिमलायां भाजपादलस्य उग्रं विरोधप्रदर्शनम्, मुख्यमन्त्रि-आवासं 'ओकओवर' प्रति प्रयाणम्

3 'जॉब ट्रेनी' चिकित्साधिकारिणां वेतने ७८ प्रतिशतं वर्धनम्- मुख्यमन्त्री सुक्खुः

5 नेपालेन इण्डोनेशियादेशेन च सह संस्कृतसहयोगाय नवीनदिशायाः प्रवर्तने प्रयतमानः उत्तराखण्डः


## राञ्ची-नगरे जेपीएससी जेएसएससी परीक्षासु कथित-अनियमितताम् अधिकृत्य छात्र-प्रतिरोधः तीव्रतरो जातः



हिमसंस्कृतवार्ता। राञ्ची-नगरस्य जयपाल-सिंह-मुण्डा-क्रीडाङ्गणे जेपीएससी तथा जेएसएससी परीक्षासु कथित-अनियमितताम् अधिकृत्य छात्रैः क्रियमाणं विरोध-प्रदर्शनं प्रतिदिनम् इतोऽपि उग्रतां भजते। आन्दोलनकारिणः छात्राः स्व-याचनानां पूर्यै आगामि-प्रावृट्-सत्रे झारखण्ड-विधानसभायाः पूर्णतया अवरोधनस्य योजनां घोषितवन्तः ।

## असम-मेघालय-राज्ययोः अति-वृष्टिपरा रक्त-वर्णीया संचेतना

भारतीय-ऋतु-विज्ञान-विभागेन गतदिने असम-मेघालय-राज्ययोः अति-वृष्टिपरा रक्त-वर्णीया संचेतना प्रख्यापिता। अनेन सहैव अरुणाचलप्रदेश-बिहार-कोङ्कण-गोवा-मध्यमहाराष्ट्र-ओडिशा-उपहिमालयी-पश्चिमवङ्गाल-सिक्किम-उत्तरप्रदेश-उत्तराखण्ड-राज्येषु अतिवृष्टिमुद्दिश्य नारंगवर्णीया-संचेतना अद्य प्रसारिता। अत्रान्तरे देहली, हरियाणा, चण्डीगढ, पञ्जाब, हिमाचलप्रदेश, जम्मू-कश्मीर तथा लद्दाख क्षेत्रेषु आगामिदिनद्वयं यावत् अति-वृष्टिः सम्भाव्यते।

## राष्ट्रपतिः धवलेश्वर-मन्दिरे पूजा-अर्चनाम् अकरोत्



राष्ट्रपतिपदासीना द्रौपदी मुर्मुः ब्रह्मपुर-नगरस्य पार्श्वस्थे धवलेश्वर-मन्दिरे पूजा-अर्चनाम् अकरोत्। अयं तस्याः ओडिशा-राज्यस्य त्रिदिवसीय यात्रायाः अन्तिमः कार्यक्रमः आसीत्। इतः पूर्वं सा गोपालपुरस्थे आर्मी एयर डिफेंस-महाविद्यालये अपि अगच्छत्। तत्र सा महाविद्यालयस्य अधिकारिभिः सहापि वार्तालापम् अकरोत्।

## सप्तत्यधिकत्रिशततमः अनुच्छेदः सहैव पञ्चत्रिंशत् ए इत्येतयोः निरसनेन जम्मू-कश्मीर-लद्दाख क्षेत्रयोः जनानां जीवने व्यापकं परिवर्तनं दृष्टम् - प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी न्यगादीत् यत् सप्तवर्षेभ्यः पूर्वं सप्तत्यधिकत्रिशततमः अनुच्छेदः सहैव पञ्चत्रिंशत् ए इत्येतयोः निरसनेन जम्मू-कश्मीर-लद्दाख क्षेत्रयोः जनानां जीवने व्यापकं परिवर्तनं दृष्टम्। सामाजिक-सञ्चार-पटलीय-सन्देशे श्रीमोदी प्राख्यात् यत् जम्मू-कश्मीरस्य लद्दाखस्य च प्रगतये सर्वकारस्य संकल्पः पुनरावर्तितः। तेनोदीरितं यत् सर्वकारः एतत् दृढीकरिष्यति यत् विकसित-भारतस्य निर्माणे सर्वेऽपि स्व-योगदानं दातुम् अवसरान् लभेरन्। वार्तासरैस्सह सम्भाषमाणः जम्मू-कश्मीरस्य भारतीय जनता पार्टीतिदलस्य अध्यक्षः सेठ-पाल-शर्मा सप्तत्यधिक-त्रिशततमस्य अनुच्छेदस्य निरसनं जम्मू-कश्मीरस्य विकासदिशि ऐतिहासिकं चरणम् इति प्रतिपादितवान्।

## भारतीय-रिज़र्व-बैंक-संस्थया अस्मिन् वित्तीय-वर्षे जीडीपी वृद्धिः षड् दशांश सप्त प्रतिशतं यावत् अनुमितः



भारतीय रिज़र्व-बैङ्क इत्यनेन अस्मिन् वित्त-वर्षे देशस्य सकल-स्वदेशीयोत्पादस्य विकास-मानाङ्कः षड्-दशमलव-सप्त-प्रतिशतं भविष्यतीति अनुमानितम्। सञ्जय मल्होत्रा इत्यसौ अकथयत् यत् देशस्य आर्थिक विकासः निरन्तरं सुदृढ-याचनया पुष्यते सहैव भारतं विश्वस्य तीव्रतम-वर्धमाना अर्थव्यवस्था वर्तते। सः सप्तविंशत्युत्तर वित्तीय वर्षस्य कृते उपभोक्ता-मूल्य-सूचकाङ्क-आधारितां मुद्रास्फीतिं पंच दशांश एक प्रतिशतात् अपचीय पंच प्रतिशतं यावत् सम्भावयति। अत्रावधेयं यत् मुद्रास्फीतेः वृद्धिः व्यापक याचनायाः स्थाने मुख्यतः खाद्य-इन्धन-मूल्यैः प्रभाविता आसीत्।

## उच्चतम न्यायालयस्य स्पष्टीकरणम् यत् युव-प्रदर्शनकारिणाम् उपरि कार्याचरणावधौ अधिकारिभिः संयमः परिपालनीयः



उच्च-न्यायालयः अवोचत् यत् युवा-छात्र-प्रदर्शनकारिणाम् उपरि कार्याचरणावधौ अधिकारिभिः संयमः परिपालनीयः। हिंसानिवारणाय हिंसाचारः विपद्-ज्वालाम् इतोऽपि प्रज्वालयिष्यति इति सर्वोच्च न्यायालयस्य अभिमतम्। भारतस्य मुख्य न्यायाधीशस्य सूर्यकान्त-महोदयस्य अध्यक्षतायाम् पीठेन अद्य देहल्यां देशस्य अन्य भागेषु च सम्प्रति सञ्जातायां हिंसायां सीजेपी-दलस्य कथित-भूमिकां सम्बध्य याचिकायाः श्रवण-वेलायाम् एषा टिप्पणी कृता।

## संसदवार्ता-: बैङ्क-साक्ष्य-विधेयकम् २०२६ लोकसभया पारितम्

**हिमसंस्कृतवार्ता, नवदेहली।**
लोकसभया बैङ्क-साक्ष्य-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं पारितम्। अपरान्हे द्विवादने प्रथम-स्थगनात् परं यदा सभा पुनः समवेता, तदा केन्द्रीय वित्तमन्त्री निर्मला सीतारामन् इत्येषा एतं विधेयकं सदने उपस्थापितवती । अस्य विधेयकस्योद्देश्यं बैङ्क-पुस्तकानां साक्ष्य-सम्बद्धं नियमं आधुनिक-डिजिटल-बैङ्किङ्ग-व्यवस्थया सह अनूकूलयितुम् अस्ति। नीट्-प्रश्नपत्र-गोप्यताभङ्गमधिकृत्य विपक्षिणां अविरत-कोलाहलस्य मध्ये एव लोकसभया चर्चया विनैव एतत् विधेयकं स्वीकृतम्। विधेयकस्य अनुमोदनानन्तरं लोकसभा आदिनाय स्थगिता। इतः पूर्वं भाषमाणः संसदीय कार्यमन्त्री किरेन रिजिजुः सदनस्य कार्याचरणेषु निरन्तर-बाधाः अवलोक्य चिन्तां प्राकटयत्। सः अवदत् यत् कार्य-परामर्श-समित्या विधेयकानां चर्चायै पर्याप्त-समयः प्रकल्पितः अथापि विपक्षिणः सहयोगं न कुर्वन्ति।

## सुभाषितम्

**विस्मयः सर्वथा हेयः,**
**प्रत्यूहः सर्वकर्मणाम्।**
**तस्माद्विस्मयमुत्सृज्य,**
**साध्ये सिद्धिर्विधीयताम्॥**
**(हितोपदेशः, सुहृद्भेद- १५)**

अर्थात्- सब कार्यों को रोकने वाले संशय को सर्वथा त्याग देना चाहिए, एवं संदेह को छोड़ कर, अपना कार्य सिद्ध करना चाहिए।


दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263


सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## कर्नाटक-राज्यस्य यादगीर-जनपदस्य सैदापुर-समीपे रासायनिक-वाष्प-स्रावेण त्रयः कार्यकर्तारः दिवङ्गताः




कर्नाटक-राज्यस्य यादगीर-जनपदस्य सैदापुर-समीपे कडेचूर-बडियाल-औद्योगिक-क्षेत्रे रासायनिक-वाष्प-स्रावेण त्रयः कार्यकर्तारः दिवङ्गताः। अनेन स्रावेण प्रभावितौ द्वौ कार्यकर्तारौ रायचूर-नगरस्य चिकित्सालये उपचारार्थं प्रवेशितौ स्तः। यादगीर-जनपदस्य उपायुक्तः राहुल-तुकाराम-पाण्डवे अवदत् यत् औषध-रसायन-निर्माण-संयन्त्रे नलिकायाः सल्फर-ऑक्साइड-वाष्पस्य श्वासाकर्षणेन एषा दुर्घटना अभवत्।

# शिमलायां भाजपादलस्य उग्रं विरोधप्रदर्शनम्, मुख्यमन्त्रि-आवासं 'ओकओवर' प्रति प्रयाणम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचले भाजपानेतृणाम्, विधायकानां जनप्रतिनिधीनां च विरुद्धं पञ्जीकृतानाम् एफ. आई. आर. प्रकरणानां विरोधे बुधवासरे भारतीय-जनता- पार्टी (भाजपा) राजमार्गेषु अवतीर्णा। भाजपा-विधायक- दलेन, दल-पदाधिकारिभिः बृहत्-सङ्ख्याकैः कार्यभिश्च शिमलायाः सी.टी.ओ. चतुष्पथि (सीटीओ चौक) काङ्ग्रेस- सर्वकारस्य विरुद्धं तीव्रं प्रदर्शनं कृतम् उच्चैः घोषाः (नारेबाजी) च कृताः। प्रदर्शनात् परं भाजपा- विधायक-दलं कार्यकर्तारश्च मुख्यमन्त्रिणः सर्वकारीय- आवासम् 'ओकओवर'-प्रति प्रस्थिताः। मुख्यमन्त्रि-आवासस्य वेष्टनस्य घोषणाम् आधारीकृत्य 'ओकओवर' इत्यस्य बहिः आरक्षकसुरक्षा वर्धिता अतिरिक्ता आरक्षक-सेना च नियोजिता। भाजपादलस्य आरोपः अस्ति यत् काङ्ग्रेस-सर्वकारः राजनीतिक-प्रतिशोधस्य भावेन भाजपादलस्य वर्तमानानां पूर्वतनानां च विधायकानां तथैव अन्यानां जनप्रतिनिधीनां विरुद्धं मिथ्या-अभियोगाः पञ्जीकरोति। दलस्य कथनम् अस्ति यत् सर्वकारः सत्तायाः दुरुपयोगं कृत्वा विपक्षस्य स्वरं निहन्तुं प्रयासं करोति, यस्य विरोधे एतत् आन्दोलनम् आरब्धम् अस्ति। भाजपा-दलेन स्पष्टीकृतं यत् सः अस्मिन् विषये स्वकीयम् आन्दोलनम् अविरतं स्थापयिष्यति, यदा च मुख्यमन्त्रि-आवासं प्रति गच्छतः प्रदर्शकान् दृष्ट्वा प्रशासनेन सुरक्षाव्यवस्था कठोरा कृता।

### जयरामठाकुरेण सर्वकाराय दत्ता सचेतना-

नेता-प्रतिपक्षः जयरामठाकुरः अवदत् यत् भाजपा-प्रदेश-अध्यक्षः राजीवबिन्दलः सहितं बहवः वर्तमानाः पूर्वतनाश्च विधायकाः निरन्तरं मिथ्या-अभियोगेषु पञ्जीक्रियमाणाः सन्ति। तेन प्रोक्तं यत् एतस्मात् कारणात् भाजपा-दलं राजमार्गेषु अवतरितुम् विवशं जातम्। तेन पक्षः कृतः यत् भाजपादलस्य वर्तमानेषु पूर्वतनेषु च विधायकेषु अधुना यावत् प्रायः एक-द्वादश (दश-द्वादश) अभियोगाः पञ्जीकृताः सन्ति प्रदेशस्य इतिहासे च पूर्वं कदापि एतादृशं न अभवत्।

### अधिकारिभ्यः अपि सचेतना

जयरामठाकुरेण मुख्यमन्त्रिणे सुखविन्दरसिंहसुक्खु-महोदयाय सचेतनां यच्छता प्रोक्तं यत् सर्वकारः एतादृशीं कार्याचरिणाम् अत्रैव स्थगयतु, अन्यथा भविष्ये गम्भीराः राजनैतिकाः परिणामाः भोक्तव्याः भवेयुः। तेन उक्तं यत् भाजपादलं एतं विषयं विधानसभायाम् अपि प्रमुखतया उत्थापयिष्यति। तेन एतदपि उक्तं यत् यदि राजनीतिकद्वेषस्य भावेन केनापि अधिकारिणा कार्याचरिणा कृता अस्ति तर्हि तादृशानाम् अधिकारिणां रिकॉर्डपत्रं स्थापयिष्यते भविष्ये भाजपासर्वकारे निर्मिते सति तेषां विरुद्धं कार्याचरिणा करिष्यते।

### 'राजनीतिक-द्वेषेण कार्यं करोति सर्वकारः'- राजीवबिन्दलः

भाजपाप्रदेश- अध्यक्षः राजीवबिन्दलः आरोपम् अकरोत् यत् सुक्खु-सर्वकारः राजनीतिक-द्वेषस्य भावेन कार्यं करोति। तेन प्रोक्तं यत् भाजप-दलेन सर्वकारस्य विरुद्धं प्रदेशव्यापी-आन्दोलनस्य शङ्खनादः कृतः अस्ति एतत् आन्दोलनम् आगामि- दिनेषु सम्पूर्णप्रदेशे निरन्तरं स्थास्यति।

### रणधीरशर्मा अवदत्- 'प्रमुखाः नेतारः लक्ष्यीक्रियन्ते'

भाजपा-विधायकः रणधीरशर्मा आरोपम् अकरोत् यत् प्रदेश-अध्यक्षः राजीवबिन्दलः, विधायकः सुधीरशर्मा, पूर्वविधायकः होशियारसिंहः, पूर्वविधायकः राजेन्द्रराणा इति सहितेषु बहुषु भाजपनेतृषु मिथ्याप्रकरणानि पञ्जीकृतानि सन्ति। तेन प्रोक्तं यत् सर्वकारः प्रदेशस्य वास्तविकेभ्यः विषयेभ्यः जनतायाः ध्यानं दूरीकर्तुं विपक्षी-नेतृषु अभियोगाः पञ्जीकारयति।

# हिमाचले ११२ मार्गाः १८९ विद्युत्-परिवर्तकाः च अवरुद्धाः, ऋतुविभागेन प्रसारिता महत्याः वर्षायाः सचेतना

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे मानसूनकाले निरन्तरं महती क्षतिः भवन्ती अस्ति। महत्या वर्षया, भूस्खलनेन नदी- उपनदीनाम प्लावनेन च राज्यस्य जनजीवनम् अतीव-अस्तव्यस्तं संजातम्। प्राकृतिक- आपदा- कारणेन प्रदेशस्य आधारभूतसुविधाः शीर्णाः जाताः। राज्य- आपातकालीन- सञ्चालनकेन्द्रस्य सूचनानुसारं बुधवासरे सायं यावत् प्रदेशे आहत्य ११२ मार्गाः, १८९ विद्युत्परिवर्तकाः, ६१ पेयजलयोजनाः पूर्णतः अवरुद्धाः जाताः। सूचनानुसारं प्रातःकाले १६८ मार्गाः अवरुद्धाः आसन्, येषु बहवः पुनः सञ्चालिताः कृताः, अनेन सायं यावत् अवरुद्धमार्गाणाम् सङ्ख्या न्यूनीभूय ११२ अभवत्। यद्यपि विद्युत्-जल-आपूर्तेः समस्यायां वृद्धिः संजाता।

### मण्डी, सोलनं सिरमौरं च सर्वाधिकं प्रभावितानि, पांवटा-साहिबक्षेत्रे विद्यालयानाम् अवकाशः

मण्डलवार-स्थितिं पश्यामः चेत् मार्ग- सम्पर्कभङ्गेन सर्वाधिका असुविधा मण्डी-मण्डले अस्ति, यत्र ३७ मार्गाः अवरुद्धाः सन्ति। तत्रैव सोलनमण्डले ९० विद्युत्परिवर्तकेषु अवरुद्धेषु बहुषु क्षेत्रेषु अन्धकारस्य स्थितिः अस्ति। एतदतिरिच्य सिरमौरमण्डले २७ पेयजल-योजनासु बाधितासु जल-सङ्कटः गम्भीरः संजातः। दुष्ट-ऋतुं छात्राणां सुरक्षां च ध्याने निधाय प्रशासनेन सिरमौरमण्डलस्य पांवटा-साहिब-उपमण्डले सर्वकारीयाणां वैयक्तिकानां च सर्वेषां शिक्षणसंस्थानां गुरुवासरे अपि स्थगयितुम् आदेशः प्रसारितः। उल्लेखनीयम् अस्ति यत् अत्र बुधवासरे अपि विद्यालयेषु अवकाशः घोषितः आसीत्।

### सिरमौर-ऊना-मण्डलयोः सर्वाधिका वर्षा-

गतेषु २४ होरासु राज्यस्य सिरमौर- ऊना- मण्डलयोः सर्वाधिका वर्षा पञ्जीकृता। राजधानी- शिमलासहितं प्रदेशस्य अधिकांश-भागेषु बुधवासरे आदिनं मेघाः छादिताः आसन् सायं काले च लघ्वी वृष्टिः अभवत्। ऋतु-विभागस्य विवरणानाम् अनुसारं जटौन-बैराज-स्थाने १३५.४ मिलीमीटर्, रायपुरमैदानस्थाने १२४.२, नयनादेवीमध्ये ११०.६, देहरा-गोपीपुरस्थाने ९७.२, नादौनस्थाने ९०, काङ्गड़ा-घमरूरस्थलयोः ७६.२, मुरारी-देवी-स्थाने ६६.६, नाहनमध्ये ६४.५ मिलीमीटरमिता वर्षा पञ्जीकृता।

### ११ अगस्त-दिनाङ्कं यावत् महत्याः वर्षायाः पीत-सचेतना प्रसारिता

ऋतु-विज्ञान-केन्द्रेण शिमलास्थेन प्रदेशे ११ अगस्तदिनाङ्कं यावत् विविधस्थानेषु महत्याः वर्षायाः सचेतना प्रसारिता। ऋतुविभागेन ६ अगस्तदिनाङ्के बिलासपुर- काङ्गड़ा- सिरमौर- मण्डलेषु, ७, ८ अगस्तदिनाङ्के सिरमौर- काङ्गड़ा- मण्डलयोः, ९ अगस्तदिनाङ्के ऊना- बिलासपुर- काङ्गड़ा-सिरमौरमण्डलेषु महत्याः वर्षायाः पीतसचेतना प्रसारिता अस्ति। तत्रैव १० तथा ११ अगस्तदिनाङ्कयोः अपि राज्यस्य बहुषु स्थानेषु महत्याः वर्षायाः पूर्वानुमानम् अस्ति। प्रशासनेन जनेभ्यः पर्यटकेभ्यश्च नदी-उपनदीभ्यः भूस्खलन- सम्भाव्य- क्षेत्रेभ्यः च दूरे स्थातुम् प्रार्थना कृता।

# बैडमिन्टन प्रतियोगिता- द्वात्रिंशत्-तमे चक्रे ईशारानी दक्षिण-कोरियायाः ली-सो-ही इत्येतां पराजितवती



दक्षिण-कोरिया-देशस्य आसान-नगरे 'कोरिया-मास्टर्स-बैडमिन्टन-आयोजितायाः प्रतियोगितायाः' महिला एकल-स्पर्धायाः द्वितीय-चक्रे भारतीय-क्रीडिकाः ईशारानी-बरुआ, तन्वी-शर्मा, श्रियांशी-वालिशेट्टी च प्रविष्टवत्यः। द्वात्रिंशत्-तमे चक्रे ईशारानी दक्षिण-कोरियायाः ली-सो-ही इत्येतां पराजितवती, तन्वी चीन-देशस्य 'आन-ची-युआन' इत्येतां पराभूय अग्रत्वं भजते, श्रियांशी च चीनी ताइपे-देशस्य 'यू-पो-पाई' इत्येतां पराभूय विजयत्वम् अवाप्नोत्। अनेन सहैव, महिला-युगल-स्पर्धायां सोनाली-सिंहः, रितिका ठाकुर इत्येतयोः युगलं दलं तथा मिश्रित-युगल-स्पर्धायां श्रुति-मिश्रः, ईशान भटनागरयोः युगलं दलमपि द्वितीय-चक्रं प्रविष्टवत्।

# HPRCA: रसायनविज्ञानशिक्षकनियोगस्य सीबीटी- परिणामः घोषितः, प्रलेखसत्यापनस्य तिथिः निश्चिता




हिमसंस्कृतवार्ताः- हमीरपुरम्। हिमाचलप्रदेश-राज्यचयन- आयोगेन बुधवासरे रसायनविज्ञानशिक्षकस्य ७८ पदभ्यः ३ जुलाई २०२६ दिनाङ्के आयोजितस्य सङ्गणकाधारित- परीक्षणस्य परिणामः घोषितः। एषः परिणामः आयोगेन स्वीकृतस्य अङ्कसूर्याः अनुपातस्य च आधारेण निर्मितः अस्ति। एतेषां पदानां पूरणाय विद्यालयशिक्षानिदेशकतः याचनापत्रं प्राप्तम् आसीत्, अस्य कृते च विज्ञापनसङ्ख्या ०७/२०२६ अप्रैल-मासस्य ७ दिनाङ्के प्रसारितम् आसीत्। एतेभ्यः पदेभ्यः २४३९ आवदेनानि प्राप्तानि, सर्वाणि च प्रास्थायिकरूपेण स्वीकृतानि। ततः परं, १९६३ परीक्षार्थिनः सीबीटी-परीक्षायां उपस्थिताः अभवन्, ४७६ परीक्षार्थिनः च अनुपस्थिताः आसन्। सीबीटी-उत्तीर्णाः २०७ परीक्षार्थिनः अग्रे चयनप्रक्रियायै/ प्रलेखसत्यापनाय चयनिताः सन्ति।

११ अगस्तदिनाङ्के भविष्यति प्रलेखानां सत्यापनं चयनितानां परीक्षार्थीनां योग्यतादिसम्बद्धानां प्रलेखानां जाञ्चः ११ अगस्त २०२६ दिनाङ्के प्रातः १०:०० वादने राज्यचयन- आयोगस्य परिसरे भविष्यति। परीक्षार्थिभ्यः निर्देशः दीयते यत् ते योग्यतासम्बद्धान् सर्वान् मूलप्रलेखान्, सर्वेषां प्रलेखानां स्वप्रमाणितप्रतीनां द्वौ समूहौ, एकं परिचयपत्रम्, अधोभारितस्य आवेदनपत्रस्य च प्रतिं सह आनयन्तु। यदि कश्चन परीक्षार्थी प्रलेखसत्यापनाय निश्चितदिने अनुपस्थितः भवति, तर्हि सः अग्रे चयनप्रक्रियायै न विचारयिष्यते, ततः परं च अन्यः अवसरः न दीयिष्यते। प्रलेखसत्यापनस्य कार्यक्रमः उचिते समये चयन- आयोगस्य अधिकृतजालपुटे प्रसारितः भविष्यति। परीक्षार्थिनः तेषां सम्बन्धित-ईमेल-माध्यमेन अपि सूचयिष्यन्ते, यत् ते चयनआयोगाय दत्तवन्तः। अस्मिन् विषये पत्रालयेन पृथक् आह्वानपत्रं न प्रेषयिष्यते। परिणामः चयन-आयोगस्य हमीरपुरस्य अधिकृतजालपुटे (http://www.hprca.hp.gov.in) अपि उपलब्धः अस्ति। एते अनुक्रमाङ्काः प्रास्थायिकरूपेण अग्रे चयनप्रक्रियायै/ प्रलेखसत्यापनाय चयनिताः-

26018000016 26018000018 26018000035
26018000052 26018000076 26018000107
26018000122 26018000127 26018000137
26018000139 26018000143 26018000156
26018000161 26018000166 26018000201
26018000203 26018000206 26018000214
26018000255 26018000280 26018000294
26018000295 26018000310 26018000321
26018000327 26018000331 26018000334
26018000358 26018000410 26018000446
26018000452 26018000465 26018000474
26018000483 26018000491 26018000494
26018000497 26018000511 26018000519
26018000544 26018000557 26018000562
26018000572 26018000600 26018000608
26018000640 26018000649 26018000653
26018000999 26018000673 26018000681
26018000709 26018000734 26018000740
26018000769 26018000787 26018000799
26018000804 26018000816 26018000822
26018000831 26018000847 26018000850
26018000851 26018000854 26018000856
26018000859 26018000876 26018000877
26018000883 26018000887 26018000894
26018000903 26018000910 26018000915
26018000938 26018000948 26018000950
26018000970 26018000983 26018000991
26018001004 26018001007 26018001039
26018001044 26018001053 26018001057
26018001077 26018001090 26018001096
26018001105 26018001111 26018001121
26018001136 26018001168 26018001173
26018001175 26018001182
26018001186 26018001204 26018001228
26018001244 26018001260 26018001275
26018001285 26018001292 26018001312
26018001318 26018001319 26018001327
26018001344 26018001354 26018001382
26018001401 26018001405 26018001414
26018001425 26018001428 26018001431
26018001433 26018001442 26018001472
26018001488 26018001494 26018001502
26018001511 26018001516 26018001573
26018001599 26018001603 26018001608
26018001619 26018001625 26018001628
26018001633 26018001635 26018001652
26018001701 26018001706 26018001712
26018001723 26018001725 26018001726
26018001733 26018001789 26018001792
26018001796 26018001803 26018001818
26018001832 26018001856 26018001870
26018001872 26018001877 26018001912
26018001956 26018001965 26018002013
26018002017 26018002030 26018002031
26018002045 26018002046 26018002054
26018002057 26018002071 26018002096
26018002097 26018002103 26018002105
26018002115 26018002134 26018002135
26018002141 26018002145 26018002147
26018002150 26018002151 26018002155
26018002166 26018002171 26018002178
26018002187 26018002210 26018002211
26018002222 26018002247 26018002270
26018002276 26018002289 26018002297
26018002299 26018002304 26018002312
26018002357 26018002365 26018002370
26018002377 26018002384 26018002386
26018002387 26018002398 26018002401
26018002404 26018002413 26018002431
26018002432

# 'जॉब ट्रेनी' चिकित्साधिकारिणां वेतने ७८ प्रतिशतं वर्धनम्- मुख्यमन्त्री सुक्खुः

हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्द्रासिंहसुक्खु राज्ये स्वास्थ्यसेवाः अतीव सुदृढाः कर्तुं दिशि एकं महत्त्वपूर्णं निर्णयं गृहीत्वा अनुबन्धित- जॉब-ट्रेनी- चिकित्साधिकारिणां (विशेषज्ञानाम्) मासिकवेतनस्य ७८ प्रतिशतम् ऐतिहासिकं वर्धनं स्वीकृतवान्। अस्य निर्णयस्य अन्तर्गतं 'जॉब ट्रेनी' चिकित्साधिकारिणः मासिकवेतनं ३३,६६० रूप्यकेभ्यः प्रवर्ध्य साक्षात् ६०,००० रूप्यकाणि कृतम् अस्ति। इतः पूर्वं २०२२ तमे वर्षे षष्ठवेतनायोगस्य अनुशंसानां प्रवर्तनानन्तरं 'जॉब ट्रेनी' चिकित्साधिकारिणः (विशेषज्ञस्य) वेतनं प्रायः २७,००० रूप्यकेभ्यः वर्धयित्वा ३३,६६० रूप्यकाणि कृतम् आसीत्, यत् प्रायः २४ प्रतिशतं वर्धनम् आसीत्। वर्तमान- राज्यसर्वकारेण तेषां वेतने साक्षात् ७८ प्रतिशतं वृद्धिः कृता। अनेन विशेषज्ञचिकित्सकाः सर्वकारीय-स्वास्थ्यसंस्थासु सेवादनाय प्रोत्साहनं प्राप्स्यन्ति, राज्यस्य सुदूरक्षेत्रेषु चापि गुणवत्तापूर्ण- स्वास्थ्यसेवाः प्रदातुं साहाय्यं लप्स्यते। सः अकथयत् यत् राज्यसर्वकारः स्वास्थ्यक्षेत्रं सुदृढं कर्तुं निरन्तरं दृढानि पदानि नयति, येन जनाः स्वगृहाणां समीपमेव श्रेष्ठं चिकित्सां तथा आधुनिक- स्वास्थ्यसुविधाः प्राप्नुयुः, चिकित्सार्थं राज्येभ्यः बहिः गन्तुं च आवश्यकता न भवेत्।

सर्वकारेण इतः पूर्वं वैद्यकीयमहाविद्यालयेषु स्नातकोत्तर- अध्ययनं कुर्वतां छात्राणां मासिक-छात्रवृत्तिः (स्टाइपेण्ड) अपि वर्धिता आसीत्। प्रथमवर्षस्य छात्राणां छात्रवृत्तिः ४० सहस्ररूप्यकेभ्यः वर्धयित्वा ५० सहस्ररूप्यकाणि, द्वितीयवर्षस्य छात्राणां ४५ सहस्ररूप्यकेभ्यः ६० सहस्ररूप्यकाणि, तृतीयवर्षस्य छात्राणां ५० सहस्ररूप्यकेभ्यः ६५ सहस्ररूप्यकाणि कृता आसीत्। वैद्यकीय-महाविद्यालयेषु स्नातकोत्तर- छात्राः स्व-अध्ययनेन सह रुग्णानां चिकित्सने अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति। तेषां उत्तरदायित्वानि दृष्ट्वा राज्यसर्वकारेण तेषां छात्रवृत्तौ इयं वृद्धिः कृता, यतः ते उत्तमाः स्वास्थ्यसेवाः प्रदातुं प्रोत्सहन्ते। वैद्यकीय-महाविद्यालयेषु 'सीनियर रेजिडेण्ट' तथा अन्य-विशेषज्ञ-चिकित्सकानां महत्त्वपूर्णं योगदानं विचिन्त्य राज्यसर्वकारेण तेषां मासिक-छात्रवृत्तौ ५० प्रतिशततः १७० प्रतिशतं यावत् वृद्धिः कृता। 'सीनियर रेजिडेण्ट', 'ट्यूटर स्पेशलिस्ट' चेत्येतेषां मासिक-छात्रवृत्तिः ६०,०००-६५,००० रूप्यकेभ्यः प्रवर्ध्य १ लक्षं रूप्यकाणि कृता आसीत्, तथा 'सुपर स्पेशलिस्ट' एवं 'सीनियर रेजिडेण्ट' (सुपर स्पेशलिस्ट) इत्येतेषां मासिक-छात्रवृत्तिः ६०,०००- ६५,००० रूप्यकेभ्यः प्रवर्ध्य १.३० लक्षं रूप्यकाणि कृता आसीत्। सुक्खुवर्येण उक्तं यत् स्वास्थ्यं शिक्षा च राज्यसर्वकारस्य सर्वोच्चप्राथमिकतासु अन्तर्भवतः।

गतेषु सार्ध-त्रिवर्षेषु सर्वकारेण द्वयोः क्षेत्रयोः व्यापक-सुधाराणां दिशि अनेकानि महत्त्वपूर्णानि निर्णयानि गृहीतानि। सः अवदत् यत् अनुबन्धित- जॉब-ट्रेनी- चिकित्साधिकारिणां वेतने कृता इयं वृद्धिः स्वास्थ्यसेवाः अतीव सशक्ताः करिष्यति, राज्यस्य जनेभ्यः च उत्तमाः चिकित्सासुविधाः प्रदातुं सहायिका सेत्स्यति। सः अवदत् यत् राज्यसर्वकारः एकतः स्वास्थ्यसंस्थासु आधुनिकप्रविधिम्, अत्याधुनिक- चिकित्सासुविधाः च विस्तारयति, अपरतः च चिकित्सकानाम् अन्य-स्वास्थ्यकर्मिणां च न्यूनतां दूरीकर्तुम् अपि प्रभाविनि पदानि नयति। सः विश्वासं व्यक्तवान् यत् एतैः प्रयासैः राज्यस्य जनेभ्यः गुणवत्तापूर्णाः स्वास्थ्यसेवाः सुनिश्चिताः भवितुं शक्ष्यन्ति

# इतिहासविभागेन 'भारते पर्यावरणस्य इतिहासः' इति विषये अतिथि-व्याख्यानम् आयोजितम्



हिमसंस्कृतवार्ताः-सरदार- पटेल- विश्वविद्यालय- मण्डीनगरस्य इतिहासविभागेन 'भारते पारिस्थितिक्याः पर्यावरणस्य च इतिहासः' इति विषये एकस्य अतिथिव्याख्यानस्य आयोजनं कृतम्। कार्यक्रमस्य मुख्यातिथिरूपेण विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. ललितकुमार अवस्थी आसीत्, यदा च मुख्य-वक्तृरूपेण डॉ. राजकुमारः (समन्वयकः सहायकाचार्यश्च, इतिहासविभागः, हिमाचलप्रदेश-विश्वविद्यालयः, क्षेत्रीयकेन्द्रं, खनियारा, काङ्गडामण्डलम्) उपस्थितः आसीत्। शुभारम्भ-अवसरे इतिहासविभागाध्यक्षः डॉ. राकेशकुमारशर्मा मुख्यातिथेः, मुख्यवक्तुः, संकायसदस्यानां, शोधार्थिनां, छात्राणां च हार्दिकं स्वागतं कुर्वन् अवदत् यत् पर्यावरणीय-इतिहासः अद्यत्वे अत्यन्तं प्रासङ्गिकम् अध्ययनक्षेत्रम् अस्ति। सः अकथयत् यत् भारतीय-सभ्यतायां प्रकृतिं प्रति सम्मानस्य, संरक्षणस्य, सन्तुलित-उपयोगस्य च समृद्धा परम्परा विद्यते, यया वर्तमानानां पर्यावरणीय-आह्वानानां समाधानाय महत्त्वपूर्णा प्रेरणा प्राप्यते।

कार्यक्रमस्य मुख्यातिथिः माननीयः कुलपतिः प्रो. ललितकुमार अवस्थी अन्तर्जालमाध्यमेन (ऑनलाइन) स्वसम्बोधने अवदत् यत् पर्यावरणसंरक्षणं केवलं वैज्ञानिकः तकनीकीविषयः वा नास्ति, अपि तु एतत् अस्माकं सांस्कृतिकचेतनया, ऐतिहासिकविरासतेन, सामाजिक- उत्तरदायित्वेन च सम्बद्धम् अस्ति। सः अवदत् यत् भारतीय-ज्ञान-परम्परायां प्रकृतिः सर्वदा पूजनीया माता अस्ति, जलस्य, अरण्यस्य, भूमेः, जैव-विविधतायाश्च संरक्षणस्य भावना अस्माकं सभ्यतायाः अभिन्नम् अङ्गम् अस्ति। सः छात्रान् आह्वानं कृतवान् यत् ते इतिहासस्य अध्ययनमाध्यमेन पर्यावरणीयचेतनाम् अवगच्छेयुः तथा च सतत-विकासस्य लक्ष्याणां प्राप्तौ स्वकीयां सक्रियां भूमिकां निर्वहेयुः। सः छात्रान् एतादृशानां शैक्षणिक-व्याख्यानानाम् अधिकाधिकं लाभं ग्रहीतुं पर्यावरणसंरक्षणं प्रति च जागरूक- उत्तरदायि-नागरिकाः भवितुम् आहूतवान्।

मुख्यवक्ता डॉ. राजकुमारः स्वव्याख्याने 'भारते पारिस्थितिक्याः पर्यावरणस्य च इतिहासः' इति विषये विस्तारेण प्रकाशं निक्षिप्तवान्। सः सूचितवान् यत् भारते पर्यावरण-संरक्षणस्य परम्परा वैदिककालात् आरभ्य आधुनिकयुगं यावत् निरन्तरं विकसिता भवन्ती अस्ति। सः प्राचीन-ग्रन्थानां, लोकपरम्पराणां, पवित्रवनानां, जलसंरक्षण- प्रणालीनां, सामुदायिक-संसाधन- प्रबन्धनस्य ऐतिहासिक- परम्पराणाम् उल्लेखं कुर्वन् अवदत् यत् भारतीय-समाजः प्रकृत्या सह सह-अस्तित्वस्य भावनायै सर्वदा महत्त्वं दत्तवान् अस्ति। सः औपनिवेशिककाले प्राकृतिकसंसाधनानां दोहनस्य, वनेषु राज्यनियन्त्रणस्य, तस्य सामाजिक-पर्यावरणीय- प्रभावानां च विश्लेषणं कुर्वन् चिपको-आन्दोलनस्य, बिश्नोई-समुदायस्य योगदानस्य, अन्य-जन-आन्दोलनानां च उल्लेखम् अकरोत्। सः अवदत् यत् वर्तमान- जलवायु- परिवर्तनस्य पर्यावरणीयसङ्कटस्य च काले इतिहासस्य अध्ययनम् अस्मान् अतीतस्य अनुभवेभ्यः शिक्षां गृहीत्वा भविष्याय अधिक- सन्तुलित- सतत- विकासस्य दिशं प्रदाति। सः छात्रान् पर्यावरणीय-इतिहासस्य क्षेत्रे शोधस्य नूतन- सम्भावनासु कार्यं कर्तुम् आहूतवान् तथा च प्रश्नोत्तर-सत्रे छात्राणां जिज्ञासायाः समाधानम् अपि अकरोत्।

अस्मिन् अवसरे विभागाध्यक्षः डॉ. राकेशकुमार शर्मा, सहायकाचार्यः डॉ. रामपालः, विकेशकुमारः, कार्यक्रमसंयोजकः राजेशशर्मा, अतिथि- प्राध्यापकः कृष्णचन्दः, लखविन्दरः, सुशान्तः, हुमेशः, ईशा, वन्दना, दिव्या, आकाङ्क्षा, वनिता, पर्वः, अजयः, नितिनश्च एतैः सह प्रथम- तृतीय- सत्रयोः छात्राश्च उपस्थिताः आसन्।

## "विश्ववित्तकोषेन एआई-अनुकूलनस्य शीघ्रं कर्तुं विकासशीलदेशान् आग्रहं कुर्वन्ति"




**हिमसंस्कृतवार्ताः- रविः खरिडेहालः, बेङ्गलुरु।**

चिकित्सासेवासु, शिक्षायां न्यायिकसेवासु च समृद्ध्यर्थं कृत्रिमबुद्धेः स्थानीयपरिस्थितौ अनुकूलनं सर्वोपरि महत्त्वपूर्णम् अस्ति। कृषिविस्तारस्य सम्भावना अपि परिकल्पिता अस्ति। अल्पमूल्याङ्कनस्य एआई-उपकरणानाम् उपयोगेन एआई- इत्यस्य आलिङ्गनं सम्भवति। विश्ववित्तकोषेन एतत् बोधितं यत् एआइ इत्येतत् उल्लिखितक्षेत्रेषु विकासशीलदेशैः न्यूनव्ययेन आलिंगयितुं शक्यते इति। कोटिकोटिजनाः शीघ्रमेव लाभं प्राप्नुवन्ति, समृद्धिं च प्राप्नुवन्ति।विश्ववित्तकोषेन २०२६ तमे वर्षे विश्वविकासप्रतिवेदने उल्लेखः अस्ति यत् शताब्दशः यावत् प्रगतिः दशकेषु प्राप्तुं शक्यते।

विश्ववित्तकोषस्य प्रतिवेदनस्य शीर्षकं "एआई प्रतिज्ञा" इति अस्ति। एआई विकासशीलानाम् अर्थव्यवस्थानां जीवनरेखां प्रदाति, एतेषां देशैः तां ग्रहीतव्या। उच्च आययुक्तेषु देशेषु अधिकं कार्यजोखिमः। तत्र १४.२% कार्याणि प्रभावितानि भवितुम् अर्हन्ति। विकासशीलदेशेषु विद्यमानानां ४.५% कार्याणां हानिः अस्ति। विकासशील अर्थव्यवस्थासु १६.२% कार्याणि एआईद्वारा अधिका उत्पादकताम् उत्पन्नं कर्तुं शक्नुवन्ति। १८.७% कार्याणि एआईद्वारा उच्च-आय-अर्थव्यवस्थासु अधिका उत्पादकताम् उत्पन्नं कर्तुं शक्नुवन्ति। एआई श्रमिकाणां स्थाने न भवति किन्तु श्रमिकाः यत् प्राप्तुं शक्नुवन्ति तत् वर्धयति। विकासशीलदेशेभ्यः प्रगतेः प्रतिज्ञा।



## वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि।

अद्य मया काश्चन विचित्राः वार्ताः आनीताः। यूरोपखण्डे दान्यूब-नद्याः जलं शुष्कं जातम्। तत्र जले द्वितीय-विश्वयुद्धस्य युद्धनौकाः विस्फोटकाः च दृष्टाः। महागजस्य अस्थीनि अपि प्राप्तानि।

**नन्दिनी-** अहो! नद्यां तादृशानि पुरातनानि वस्तूनि दृष्टानि इति महद् आश्चर्यम्। अन्या वार्ता अपि श्रूयताम्। केनचित् जनेन काफी-पेषकस्य पिधानं नष्टम्। अतः कृत्रिमबुद्ध्या नूतनं पिधानं यन्त्रेण मुद्रणार्थं रचितम्।

**काव्या-** कृत्रिमबुद्ध्या तत् पिधानं रचितम् इति अतीव रोचकम्। अधुना इटली-देशस्य वार्तां शृणु।

तत्र एकेन जनेन प्रयुत-मूल्यकं भाग्यपत्रम् अवकरकुण्डे क्षिप्तम्। परन्तु स्वच्छताकर्मकरैः तत् अन्विष्य रक्षितम्।

**नन्दिनी-** भाग्यपत्रं कर्मकरैः प्राप्तम् इति तस्य जनस्य महद् भाग्यम्। अन्ते अन्तरिक्षस्य वार्ता। वैज्ञानिकैः एकं विशालं कृष्णविवरं दृष्टम्। तत् कृष्णविवरम् आकाशगङ्गायाः केन्द्रं त्यक्त्वा प्रान्तभागं गतवत् अस्ति। अतीव विचित्राः एताः वार्ताः।

# लौकिकन्याकोशः

# आरण्यमलकन्यायः

अरण्ये एकम् आमलफलम् उत्पन्नम्। कुतश्चित् दूरात् समुद्रात् आनीतं लवणम्। द्वयोः मेलनेन कृतः उपलेहः। तथैव कुत्रचित् जातः पुरुषः अन्यत्र कुत्रचित् जाता स्त्री। तयोः मेलनं भवति सः च संसारः बहुकालं यावत् सम्यग्रीत्या प्रवर्तते। एतादृशस्य संदर्भस्य वर्णनम् अनेन न्यायेन क्रियते।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



# वैध-बीमां विना न लप्स्यते इन्धनम्!, सर्वोच्च-न्यायालयः 'IRDAI' संस्थायै प्रेषितवान् प्रस्तावम्




**हिमसंस्कृतवार्ताः- नवदेहली।** सर्वोच्चन्यायालयः वैधवाहनबीमां विना राजमार्गेषु चलद्भिः वाहनेषु कठोरताम् आनेतुं परामर्शं दत्तवान्। न्यायेन 'IRDAI', 'मार्गपरिवहन एवं राजमार्ग मंत्रालय' इत्येताभ्यां च तादृशस्य 'पायलट- प्रोजेक्ट' इत्यस्य रचनां कर्तुं प्रोक्तम्, यस्य अन्तर्गतं पेट्रोल-पंपस्थानेषु ईन्धनस्य दानात् पूर्वं वाहनस्य बीमा-परीक्षणं क्रियेत। यद्यपि एषः अधुना केवलं प्रस्तावः अस्ति, सम्पूर्णे देशे प्रवर्तितनियमः न संजातः। प्रस्तावस्य अनुसारं पेट्रोलपंपस्थानेषु वाहनस्य बीमापरीक्षणं करिष्यते। यदि वाहनस्य बीमा सिद्धा (वैधा) न भविष्यति, तर्हि तस्मै 'पेट्रोल' 'डीजल' इन्धनस्य प्रदाने प्रतिषेधः कर्तुं शक्यते। अस्य उद्देश्यं जनान् अनिवार्य- मोटर-बीमानियमानां पालनाय प्रेरयितुम् अस्ति। सर्वोच्चन्यायालयः मार्गेषु 'हाईवे' इत्येतेषु च स्थापितान् 'ANPR' यन्त्राणि वाहन- बीमा- 'डाटाबेस' इत्यनेन सह संयोजयितुम् अपि परामर्शं दत्तवान्। अनेन यन्त्राणि एतत् ज्ञातुं शक्ष्यन्ति यत् वाहनस्य बीमा सिद्धा अस्ति वा न वा। यदि बीमा न भविष्यति, तर्हि सम्बद्धस्य वाहनस्य 'ई-चालान' पत्रं प्रसारयितुं शक्यते। न्यायेन 'ट्रैफिकपुलिस' दलस्य कृते 'मोबाइल-ऐप' अथवा 'हैंडहेल्ड- डिवाइस' उपकरणानि उपलब्धं कारयितुम् अपि परामर्शः दत्तः। अस्य साहाय्येन आरक्षण-दलं स्थाने एव वाहनस्य बीमास्थितिं द्रष्टुं शक्ष्यति। अनेन प्रपत्राणां दर्शनस्य आवश्यकता न्यूना भविष्यति बीमाविहीनानां वाहनानां च शीघ्रं परिचयः भवितुं शक्ष्यति।

तृतीयांश-बीमायाः अवधेः वर्धनस्य परामर्शः

सर्वोच्चन्यायालयः नूतनवाहनानां अनिवार्य- तृतीयांश- बीमायाः अवधिं वर्धयितुम् अपि प्रस्तावं स्थापितवान्। नूतनकाराणां कृते अवधिं ३ वर्षेभ्यः वर्धयित्वा ४ वर्षाणि यावत् कर्तुं परामर्शः दत्तः। नूतनानां द्वि-चक्रवाहनानां कृते एषा अवधिः ५ वर्षेभ्यः वर्धयित्वा ६ वर्षाणि यावत् कर्तुं चर्चा कृता।

कठोरता किमर्थम्?

न्यायालयः इच्छति यत् सर्वे वाहन-स्वामिनः अनिवार्य-तृतीयांश-बीमायाः पालनं कुर्वन्तु। यदि एते प्रस्तावाः प्रवर्तिताः भवन्ति, तर्हि 'पेट्रोलपंप' स्थानेषु, मार्गेषु स्थापित-यन्त्रेषु 'ट्रैफिकपुलिस' दले च त्रिषु स्तरेषु बीमा-विहीनानां वाहनानां परिचयः सुकरः भविष्यति। सम्प्रति एतेषु सर्वेषु परामर्शेषु सम्बद्धाः विभागाः 'पायलट-प्रोजेक्ट' प्रारूपं रचयिष्यन्ति, अस्य अनन्तरमेव अग्रे कश्चन निर्णयः गृहीष्यते।

# 'गजनी' चलच्चित्रस्य खलनायकः प्रदीप रावतः दिवङ्गतः, आमिरखानेन सह 'लगान' चलच्चित्रे अपि दृष्टः आसीत्, 'महाभारते' अपि अभिनयं कृतवान्



**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।** भारतीयस्य चलच्चित्रजगतः प्रसिद्धः वरिष्ठः च अभिनेता प्रदीप रावतः दिवङ्गतः। सः सुदीर्घकालं यावत् कर्करोगेण (कैन्सर-रोगेण) पीडितः आसीत्। तस्य एषा बीमारी (रोगः) शाम्यतां गता आसीत्, किन्तु पश्चात् कर्करोगः पुनः प्रत्यागतः। अस्मिन् वारे सः एतं संग्रामं जेतुं न अशक्नोत्। वार्तानुसारम्, मङ्गलवासरे चतुःसप्तति (७४) वर्षे वयसि प्रदीप रावतः जगत् इदं सदा सर्वदैव त्यक्तवान्।

प्रदीप रावतः भारतीयचलच्चित्रजगतः वरिष्ठेषु अभिनेतृषु अन्यतमः आसीत्। सः दाक्षिणात्य- बॉलीवुड- उभयोः चलच्चित्र- उद्योगयोः बहुदशकपर्यन्तं कार्यम् अकरोत्। तथापि सः दाक्षिणात्यचलच्चित्राणां कृते अधिकं प्रसिद्धः आसीत्। बॉलीवुड-उत्कृष्टचलच्चित्रे 'गजनी' इति नामके सः आमिरखानेन सह सह-अभिनयम् अकरोत्। अस्मिन् चलच्चित्रे सः क्रूरस्य खलनायकस्य 'गजनी' इत्यस्य भूमिकाम् ऊढवान्। अस्याः एव भूमिकायाः कारणात् सः हिन्दीभाषिक्षेत्रेषु अपि महतीं लोकप्रियतां प्राप्तवान्। अल्पे एव जनाः जानन्ति यत् प्रदीप रावतः आमिरखानस्य ऑस्कर-नामाङ्किते 'लगान' चलच्चित्रे अपि दृश्यते स्म। अस्मिन् चलच्चित्रे सः सर्वाङ्गीणस्य (ऑलराउंडर) 'देवा सिंह सोढ़ी' इत्यस्य भूमिकाम् ऊढवान्। इदं ज्ञात्वा आश्चर्यं भविष्यति यत् प्रदीप रावतः 'महाभारत' धारावाहिके अपि दृष्टः आसीत्। अस्मिन् धारावाहिके सः 'अश्वत्थामा' इत्यस्य भूमिकाम् अकरोत्। स्ववृत्तिजीवनस्य आरम्भे सः चलच्चित्रैः सह दूरदर्शन-धारावाहिकेषु अपि कार्यं करोति स्म।

# लखनऊ-कानपुर-द्रुतमार्गस्य शुल्कग्रहणं स्थगितम्, निर्माणदोषानां कारणेन कार्याचरणं विधास्यते



हिमसंस्कृतवार्ताः — सत्येन्द्रः पाठकः, लखनऊ।लखनऊ-कानपुरयोः मध्ये नवनिर्मितस्य द्रुतमार्गस्य टोल-शुल्कग्रहणं स्थगितम् अस्ति। मार्गस्य विभिन्नेषु भागेषु निर्माणदोषाः दृष्टाः इति कारणेन सज्जाकार्यं प्रचलति। कार्यसम्पूर्तिपर्यन्तं यात्रिभ्यः टोल-शुल्कं न दातव्यम् इति राष्ट्रियमार्गप्राधिकरणेन सूचितम्।

प्राप्तसूचनानुसारं प्रायः त्रिषष्टि किलोमीटर दीर्घस्य अस्य द्रुतमार्गस्य निर्माणे चतुःसहस्रद्विशताधिककोटि-रूप्यकाणि व्ययितानि। द्रुतमार्गस्य उद्घाटनं गतस्य जुलाईमासस्य त्रयोदशे दिनाङ्के अभवत्। उद्घाटनानन्तरं विंशतिदिनेषु मार्गस्य पञ्चसु स्थानेषु भूमेः धसनेन सम्बन्धिताः समस्याः प्रकाशं गताः।अस्याः परिस्थितेः अनन्तरं राष्ट्रियमार्गप्राधिकरणस्य लखनऊ-एकके पत्रकारसम्मेलनं आयोजितम्। क्षेत्रीयाधिकारी गौतमविशालः अवदत् यत् परियोजनानिदेशकः नकुलप्रकाशवर्मा लापरवाहीकारणेन पदात् अपसारितः अस्ति। तस्य स्थाने बरेलीपरियोजनानिदेशकः नवरत्नः लखनऊस्य दायित्वं प्राप्तवान्।पूर्वपरियोजनानिदेशकः सौरभचौरसियः अपि आरोपपत्रं प्राप्तवान्। तस्य कार्यकाल एव द्रुतमार्गस्य अधिकांशस्य निर्माणकार्यस्य सम्पन्नता अभवत् इति सूचितम्।निर्माणदोषसम्बद्धे प्रकरणे निर्माणसंस्थायाः परियोजनाप्रबन्धकः विवेककुमारगुप्तः, स्वतन्त्र-अभियन्तृदलस्य प्रमुखः सुरेन्द्रकुमारः तथा निवासी-अभियन्ता यतेन्द्रकुमारः परियोजनायाः दायित्वात् अपसारिताः। तेषां विरुद्धे द्विवर्षपर्यन्तं सम्बन्धितसरकारीपरियोजनासु सहभागितायाः प्रतिबन्धः अपि आरोपितः अस्ति।निर्माणसंस्था पीएनसी इन्फ्राटेक लिमिटेड् अयोग्या घोषिताऽस्ति। संस्थया स्वव्ययेन प्रभावितमार्गभागस्य मरम्मतायै प्रायः त्रिकोटिरूप्यकाणि व्ययितव्यानि भविष्यन्ति। संस्थायाः गारण्टी जब्ती, कर्मचारिषु प्रतिबन्धः तथा संस्थायाः रेटिङ्ग न्यूनकरणसम्बन्धी कार्यवाही अपि कृता अस्ति।मार्गस्य तकनीकीपरीक्षणं लेजर-प्रोफिलोमीटर-यन्त्रेण क्रियमाणम् अस्ति। साथमेव भारतीयप्रौद्योगिकीसंस्थानस्य खड़गपुरस्य विशेषज्ञदलम् अपि विस्तृतां तकनीकीपरीक्षां करिष्यति। दलं मार्गस्य समस्यायाः मूलकारणं ज्ञात्वा सुधारात्मक-उपायानां विषये प्रतिवेदनं प्रदास्यति।अधिकारिणां अनुसारं मरम्मतकार्यं पूर्णं भवितुं यावत् लखनऊ-कानपुर-द्रुतमार्गे टोल-शुल्कवसूली पूर्णतया स्थगिता भविष्यति। यात्रिणः अस्मिन् अवधौ द्रुतमार्गस्य निःशुल्कं प्रयोगं कर्तुं शक्नुवन्ति। टोल-राजस्वस्य सम्भावितहानिः निर्माणसंस्थातः अधिगृह्यते।

## डॉ.विदुषी अग्रवालः हास्यकणिका

पतिः, पत्नी, पतिमाता (श्वश्रूः) च त्रयः उपविष्टाः सन्ति।

**पतिः-** (पत्नीं प्रति) विवाहानन्तरं त्वं मया सह यथा कलहं करोषि, अहं मरीचिकेव अत्यन्तं तीक्ष्णः अस्मि, अतीव तीक्ष्णः। पत्नी पतिं पश्यति, किन्तु किमपि न वदति।

**श्वश्रूः उक्तवती-** मरीचिका यावत् तीक्ष्णा भवतु, भार्या तस्याः लवणम् अवश्यमेव निर्माति।

**पतिः-** पत्नी श्वश्रूः च 🤣 😂 😅

पत्नी श्वश्रूम् अपृच्छत्- "मातः, वरस्य विवाहयात्रायां बहवः जनाः किमर्थम् आगच्छन्ति?"

तदा पतिः अवदत्- "एतत् तु अस्माकं पुराणेषु अपि लिखितम् अस्ति- 'सुखे गच्छेत् वा मा गच्छेत्, दुःखे तु अवश्यं गच्छेत्।'

पत्नी 😖 😠

पतिः श्वश्रूः च 😂 🤣 😅

# सीबीएसई-टेबलटेनिस-प्रतियोगितायां डी.पी.एस.-बोकारोविद्यालयस्य विद्यार्थिनां दैदीप्यमानः विजयः, राष्ट्रियस्पर्धायां चयनम्



हिमसंस्कृतवार्ता, -सौरभः दे बोकारो। राँची-नगरे आयोजितायां सीबीएसई-क्लस्टर-३ टेबलटेनिस-प्रतियोगितायां दिल्ली पब्लिक स्कूल, बोकारो-विद्यालयस्य छात्राः स्वक्रीडाप्रतिभया उल्लेखनीयां सफलतां प्राप्तवन्तः। उत्कृष्टप्रदर्शनस्य फलस्वरूपम् आइवी दास तथा पीयूषकुमारः इत्येतौ विद्यार्थिनौ आगामिनि अक्टूबर-मासे २०२६ तमे वर्षे गुजरात-राज्ये आयोज्यमानायां राष्ट्रिय-टेबलटेनिस-प्रतियोगितायाः व्यक्तिगतस्पर्धायां सहभागितायै चयनितौ। तदतिरिक्तम् विद्यालयस्य अधः-१४ बालिकादलम्, अधः-१९ बालिकादलम् तथा अधः-१९ बालकदलम् अपि राष्ट्रियस्तरीयस्पर्धायां स्थानं सुनिश्चितवन्तः।

मङ्गलवासरे आयोजितायां विद्यालयसभायां प्राचार्यः डाॅ. ए. एस. गङ्गवारः सर्वान् विजेतॄन् प्रतिभागिनश्च पदकैः प्रमाणपत्रैश्च सम्मान्य तेषां मनोबलम् अवर्धयत्।अधः-१९ बालकदलस्पर्धायां निशान्तः, पीयूषकुमारः, बिशायन पॉल तथा हरमीतसिंहः इत्येते रजतपदकं प्राप्तवन्तः तथा प्रथमोपविजेतृस्थानम् अलभन्त। तत्रैव पीयूषकुमारः व्यक्तिगतस्पर्धायामपि रजतपदकस्य विजेता अभवत्।अधः-१९ बालिकादलस्पर्धायां आइवी दास, देवांशी सिन्हा तथा श्रेयसी इत्येताः रजतपदकं प्राप्तवत्यः। व्यक्तिगतस्पर्धायां आइवी दास कांस्यपदकं स्वनाम्नि कृतवती।अधः-१४ बालिकादलस्य ईशान्वी शिवा, स्वधा प्रियवि तथा आद्या लिशा इत्येताः अपि रजतपदकं प्राप्वा प्रथमोपविजेतृस्थानम् अलभन्त। अधः-१४ बालकदलस्य प्राञ्जलकुमारः, अध्यांशकश्यपः, प्रशान्तभूषणः तथा शिवांशराजः, अधः-१७ बालकदलस्य च अङ्कितकुमारपटेलः, आकर्षकुमारः, पार्थ आयुष्मानः तथा रयान शानः स्वस्ववर्गयोः कांस्यपदकं प्राप्वा द्वितीयोपविजेतृस्थानम् अलभन्त।अस्यां क्लस्टर-३ प्रतियोगितायां ७६ विद्यालयेभ्यः ३५० अधिकाः क्रीडकाः सहभागित्वम् अकुर्वन्। अवसरेऽस्मिन् प्राचार्यः डा. ए. एस. गङ्गवारः अवदत् यत्— "क्रीडा केवलं शारीरिकस्वास्थ्यस्य साधनं न, अपितु अनुशासनम्, एकाग्रतां, दलभावनां च संवर्धयति। अस्माकं विद्यार्थिनः परिश्रमेण क्रीडासौजन्येन च एतां सफलतां प्राप्तवन्तः। गुजराते आयोज्यमानायां राष्ट्रियस्पर्धायामपि ते विद्यालयस्य राज्यस्य च यशः वर्धयिष्यन्ति।"

# 'धरोहर' इति सांस्कृतिकमहोत्सवस्य द्वितीये दिने अन्तरसदनीय-राष्ट्रभक्तिगीत-समूहगानस्पर्धा सम्पन्ना



**हिमसंस्कृतवार्ता-सौरभः दे बोकारो।** दिल्ली पब्लिक स्कूल, बोकारो-विद्यालयस्य प्राथमिक-विभागे आयोजितस्य 'धरोहर' इति त्रिदिवसीय-सांस्कृतिकमहोत्सवस्य द्वितीये दिने अन्तरसदनीय-राष्ट्रभक्तिगीत-समूहगानस्पर्धा सम्पन्ना। राष्ट्रध्वजवर्णैः शोभितवस्त्राणि धारयन्तः छात्राः मधुरैः देशभक्तिगीतैः सम्पूर्णं वातावरणं राष्ट्रप्रेम्णा पूरितवन्तः। तेषां सुमधुरस्वरैः, सम्यक्-लयेन, उत्कृष्टसमन्वयेन च सर्वे दर्शकाः मन्त्रमुग्धाः अभवन्।
स्पर्धायां गङ्गा-, चेनाब-, झेलम्-, रावी-, सतलज- तथा यमुना-सदनस्य छात्राः राष्ट्रभक्तिपरगीतानि भावपूर्णतया प्रस्तुतवन्तः। निर्णायकानां निर्णयानुसारं सतलज-सदनं यमुना-सदनं च संयुक्तविजेतारौ घोषितौ। गङ्गा-सदनं द्वितीयस्थानम्, झेलम्-रावी-सदने च संयुक्ततृतीयस्थानम् अलभेताम्।
विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवार-महोदयः सर्वेषां प्रतिभागिनां प्रशंसां कृत्वा अवदत् यत् संगीतं मनसः शान्तिं, प्रेरणां च ददाति। राष्ट्रभक्तिभावस्य संवर्धने एतादृशानां सांस्कृतिककार्यक्रमाणां महत्त्वम् अपि प्रतिपादितवान्। निर्णायकत्वेन श्रीमृत्युञ्जयभट्टाचार्यः, श्रीविक्की आनन्दपाठकः तथा श्रीशुभोजीतमिश्रः स्वकर्तव्यं सम्यक् निर्वाहितवन्तः।

# संस्कृतभारत्याः बोकारो-नगर-शाखायाः तत्त्वावधाने स्वर्गीय-रामप्रतापदुबे-स्मृत्यर्थम् अन्तर्विद्यालयीया श्लोकपाठ-प्रतियोगिता



**हिमसंस्कृतवार्ता-सौरभः दे बोकारोनगरम्।** संस्कृतभारत्याः बोकारो-नगर-शाखायाः तत्त्वावधाने स्वर्गीय-रामप्रतापदुबे-स्मृत्यर्थम् अन्तर्विद्यालयीया श्लोकपाठ-प्रतियोगिता सरस्वतीविद्यामन्दिरे, सेक्टर-३/सी, वैदिकमन्त्र-उच्चारणेन, दीपप्रज्वलनेन, सरस्वतीपूजनेन च साङ्गोपाङ्गं समायोजिता। प्रतियोगिता त्रिषु वर्गेषु—बालवर्गे (पूर्वनर्सरीतः चतुर्थकक्षापर्यन्तम्), किशोरवर्गे (पञ्चमकक्षातः अष्टमकक्षापर्यन्तम्) तथा तरुणवर्गे (नवमकक्षातः द्वादशकक्षापर्यन्तम्)—आयोजिता। कार्यक्रमस्य अध्यक्षतां प्रख्यातः समाजसेवी श्रीभागीरथशर्मा महोदयः अकरोत्। विशिष्टातिथित्वेन अवकाशप्राप्तः प्राचार्यः श्रीकमलेशकुमारमिश्रः, संस्कृतभारत्याः मन्त्री डॉ. उदयचन्द्रझा, अध्यक्षः डॉ. रामनारायणसिंहः तथा प्रतियोगितानां प्रायोजकः श्रीसन्तोषकुमारदुबे उपस्थिताः आसन्।उद्घाटनभाषणे श्रीभागीरथशर्मा महोदयः अवदत् यत् संस्कृतम् अस्माकं संस्कृतेः, संस्काराणां, राष्ट्रस्य च मूलाधारः अस्ति। श्रीसन्तोषकुमारदुबे संस्कृतभाषायाः प्रचार-प्रसार-रक्षण-संवर्धनयोः स्वस्य दृढसङ्कल्पं प्रकटयन् सर्वान् पालकान् स्वबालकान् संस्कृताध्ययने प्रेरयितुम् आह्वयत्।संस्कृतभारत्याः मन्त्री डॉ. उदयचन्द्रझा संस्कृतभाषां समाजस्य संजीवनी इति निरूप्य आयोजकानां तथा प्रतिभागिनां छात्राणां प्रति कृतज्ञतां प्रकटितवान्। पूर्वप्राचार्यः श्रीकमलेश-कुमारमिश्रः संस्कृतस्य वैज्ञानिकतां नैतिकमूल्यानि च प्रतिपादयन् उक्तवान् यत् संस्कृताध्ययनमेव सुसंस्कृतसमाजनिर्माणस्य प्रमुखमाध्यमम् अस्ति। अन्ते संस्कृतभारत्याः अध्यक्षः डॉ. रामनारायणसिंहः समागतानाम् अतिथीनां, निर्णायकानां, अभिभावकानां, कार्यकर्तॄणां तथा छात्राणां हार्दिकं धन्यवादम् अर्पितवान्। कार्यक्रमस्य सञ्चालनं डॉ. रणजीतझा महोदयेन कृतम्। संयोजकः डॉ. श्रीहरिपाण्डेयः स्वर्गीय-रामप्रतापदुबे-महोदयस्य संस्कृतसेवाम् अनुस्मारयन् तस्य जीवनवृत्तम् उपस्थितजनान् अवबोधयत्। प्रतियोगितायां २७५ अधिकाः छात्राः छात्रश्च उत्साहपूर्वकं सहभागित्वम् अकुर्वन्। कार्यक्रमे संस्कृतानुरागिणः, अभिभावकाः, शिक्षकाः तथा गण्यमान्यनागरिकाश्च बहुसंख्यया उपस्थिताः आसन्। कार्यक्रमस्य सफलसम्पादने संस्कृतभारत्याः बोकारो-जिलाशाखायाः शिक्षकाः, कार्यकर्तारः तथा स्वयंसेवकाः समर्पितभावेन स्वकीयम् अमूल्यं योगदानम् अददुः।

# नेपालेन इण्डोनेशियादेशेन च सह संस्कृतसहयोगाय नवीनदिशायाः प्रवर्तने प्रयतमानः उत्तराखण्डः

**हिमसंस्कृतवार्ता धीरजमैथानी, देहरादूनम्, ०५ अगस्तमासः (हि.स.)।** विश्वसंस्कृतदिवसात् पूर्वम् उत्तराखण्डराज्येन संस्कृतस्य वैश्विकप्रचारप्रसाराय भारतीयज्ञानपरम्परायाश्च विस्ताराय नवीनप्रयत्नः कृतः। अनेन प्रयत्नेन नेपालेन इण्डोनेशियादेशेन च सह शैक्षणिकसांस्कृतिकसहयोगस्य सुदृढीकरणाय प्रयासाः तीव्रीकृताः। राज्यस्य संस्कृतशिक्षासचिवः दीपककुमारः नवदेहल्यां नेपालदूतावासे इण्डोनेशियादूतावासे च पृथक् उपवेशनेषु संस्कृतानुसन्धानस्य शैक्षणिकविनिमयस्य संयुक्तशोधस्य च प्रवर्धनविषये विस्तृतां चर्चाम् अकरोत्।संस्कृतशिक्षासचिवः दीपककुमारः नेपालदूतावासे कार्यवाहकराजदूतं डा सुरेन्द्रथापाम् अभ्यगच्छत्। तत्र संस्कृतस्य वैश्विकमहत्त्वस्य भारतनेपालयोः शैक्षणिकसहयोगस्य च अधिकसुदृढीकरणविषये विचारविमर्शः अभवत्। उपवेशने उत्तराखण्डसंस्कृतविश्वविद्यालयस्य नेपालसंस्कृतविश्वविद्यालयस्य च मध्ये प्रस्तावितस्य समझौताज्ञापनस्य संयुक्तानुसन्धानस्य आचार्यविद्यार्थिविनिमयस्य संस्कृताध्ययनविस्तारस्य च विषये चर्चा कृता। डॉ सुरेन्द्रथापा उत्तराखण्डसरकारस्य प्रयत्नान् प्राशंसत्। सः अवदत् यत् नेपालस्य संस्कृतपरम्परा अतीव समृद्धा अस्ति तथा च उभयदेशयोः सहयोगेन संस्कृतशिक्षायाः अनुसन्धानस्य च नूतना गतिः भविष्यति।
दीपककुमारः अवदत् यत् उत्तराखण्डस्य राज्यपालः लेफ्टिनेन्टजनरलः निवृत्तः गुरमीतसिंहः संस्कृतभाषां सरलां व्यवहारिकीं च भाषाम् मन्यते। सः कृत्रिमबुद्धेः माध्यमेन संस्कृताध्ययनं शुद्धोच्चारणं च अधिकं सुगमं कर्तुं निरन्तरं प्रेरयति। सः अपि अवदत् यत् मुख्यमन्त्रिणः पुष्करसिंहधामिनो नेतृत्वे राज्यसर्वकारः संस्कृतस्य संरक्षणसंवर्धनयोः कृते नानाविधान् अभिनवान् प्रयत्नान् करोति तथा च राज्यस्य सर्वेषु त्रयोदशजनेषु त्रयोदश संस्कृतग्रामाः स्थापिताः सन्ति।सः अवदत् यत् अगस्तमासस्य अष्टाविंशतितमे दिने विश्वसंस्कृतदिवसस्य अवसरः भविष्यति। तस्मिन् दिने उत्तराखण्डसंस्कृतविश्वविद्यालये उत्तराखण्डसंस्कृतसंस्थाने संस्कृतग्रामेषु विविधेषु गुरुकुलेषु च संगोष्ठ्यः व्याख्यानानि कार्यशालाः सांस्कृतिककार्यक्रमाः जनजागरूकताअभियानानि च आयोजितानि भविष्यन्ति। एतेषां कार्यक्रमाणां उद्देश्यः आधुनिकसमाजे संस्कृतभाषायाः प्रासङ्गिकतां प्रकाशयितुम् अस्ति।एतस्मिन् एव क्रमे संस्कृतशिक्षासचिवः दीपककुमारः नवदेहल्यां स्थितस्य इण्डोनेशियागणराज्यस्य दूतावासे कार्यवाहकराजदूतं युधोसासोंगकोम् अपि अभ्यगच्छत्।